वीर रत्नेश्वर

गहनार्थप्रकाशिका प्रथम श्लोकव्याख्या

४५८

नं ४५८ [illegible]
[illegible]

नं: ४५८

ॐ स्वस्ति श्रीगणेशाय नमः ॥ यदङ्घ्र्यग्रेण लीलयैव धृतानन्तरणी येनास्त यस्याखिलाधारो येन धरोद्धृता
नैरन्तिक्ष्यो यस्य मायया बद्धः येनेयं जगती जिताग्रुरुत्क्षोणायायो महीभारहृद्यः भूमानोऽन्यजनाश्रय
लोऽस्म भवतां स्ताद्धि शुन्तारो मुदे ॥ यो ब्रह्मा धरणं यत्तोऽखिलमिदं तत्पदः पाकस्थो यो येनानीति सर्व
मेतद्दृश्यं यस्यास्ति निर्यन्त्रणम् यो निष्पृष्ठविभासकः फलदिदं यस्यामृतास्फालनात्सर्वेदं
यद्दत्तुग्रकात्स भवतां स्ताद्दृष्टमूर्तिर्मुदे ॥ भवन्नियमयन्त्रितं निखिलमेतदाद्यो गुरुर्भवांस्त्रि
ग. प्र. जगतां त्वयाज्वलनमर्कमूर्छास्मृतम् कथं श्रव धृतालक्षुत्रि पद्यगोन्नमाङ्कः हृतं मयेति शिवया
सितं पूवरतं श्रीवं संस्तुवे ॥ अबोधमात्सर्यतमोऽहतेन हृतैर न चैस प्रद्रुत्तप्रगल्भाकिणा मुधा तिर
ग. प्र. स्कृता प्यात्मगुणानुकूहाप्यलो विस्फूरीत्येव धराण्य ननन्तरा ॥ पराशयानानरज्ञत्वं भूतिर्भू
टी. मौसतारवलु नेत्रानिरेक्ककलघडुलेभामृदुलाप्रयाः ॥ अतस्त्वस्त्वयमेवाव दिग्धाशुं वंद्यस्ते
१

यामध्यहम् स्वीकृतो हन्त्यायेन बुध्यन्तां विबुधा इति ॥ अथात्र सर्वथा सारसुधायां श्री
रत्नपूर्वस्वेश्वरि स्वामिभ्यो या मननत्राय समाप्तिप्रचयगमनार्थं स्वामिश्रेत मङ्गलवचो
भावि स्तुत्या त्वौत्तहृयोपनिबध्नन्ति श्रुतानुसारतया श्लोकयति जयतीति ॥ जयतिज
गति सेकः सर्वकारी स्वतन्त्रः परमविमलबोधः स्वप्रकाशस्वरूपः अकलितमहिमा
यः सर्वमिच्छाविलासं प्रभुपदयुजः रूपं स्वात्ममात्रं विधत्ते ॥ एकः स्वतन्त्रः इति
सर्वप्रसिद्धः एकोऽद्वितीयः सर्वव्यापी सेकः इति सोऽविलोप इति पादपूरणे सन्धिः स्व
तन्त्रोऽन्यानपेक्षः जगति गच्छतीति विकारमिति जगत् स्थावरजङ्गमात्मकं नामरूपजा
तं सर्वं तत्र जयति सर्वोत्कर्षेण वर्तते विदितवेद्यानां तेषां त्वेनाभातीत्यर्थः तथा भू
तेचात्र कायवाङ्मनसां तदेकविषयता लक्षणप्रह्वता स्वस्यार्थोदायाज्जीति तं प्रत्य

हंप्रणत इति वस्तु ध्वन्यते, तत्तस्य रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रो
२ क्त इति भावध्वनिरपि सहृदयहृदयाह्लादकोऽभिव्यज्यते। मध्यस्थतया च तद्गुणस्तवीभा
वनात् तु यास्य सर्वजनिमत्तां चैतादृगाशुंसनमपार्थ्यादायतीति सर्वोनुग्राह्य एव तद्
नुर्षः स्वप्रकृतां च प्रादुर्भवतादिति आशीर्लक्षणमपि वस्त्वाशूयमावर्जयतीति, तत
स्तु सत्यामीदृश्यां सद्रीतौ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति विशेषकेन
चारितार्थ्येनादृक्प्रकारेणाश्रितो यत्त्रितयमपि चैतद्युगपदुल्लसति, येन मङ्गल
बाहुल्येनार्थबाहुल्यं च स्यात् कारणानुगुण्येन कार्योत्पादात्, कोसौ कीदृक्स्वरूप
ग. प्र. स्तुत्यत आह, परमेति, परमविमलबोधः अस्ति च बोधवैमल्यं परत्रापीति परमविशु
टी. २ द्धत्वम् यद्बोधलेशमात्रयापि जगति अन्येपि केचिद्विमलबोधा इति गण्यन्ते स स्वय

परमविमलबोधः चिदानन्दघनस्वरूप इत्यर्थः । उक्तोस्य तात्त्वमित्यतस्त्वाह । स्वप्रका
शस्वरूप इति । यदधीनं सर्वस्य प्रकाशनं स स्वयं स्वप्रकाशस्वरूप इति नात्र काचिद्विकल्प
ना । यदुक्तं श्रुतिः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति । निबद्धं च सू
त्रकृता । अनुकृतेस्तस्य चेति । इति विशेषणद्वयेन स्वरूपलक्षणेन साक्षादुक्तेऽपि तट
स्थलक्षणमपि सर्वज्ञत्वलक्षणमानुषङ्गिकं कथितं भवति साक्षाच्च तदेवाधुना सा
धयति । सर्वकारीति । सर्वकर्तेत्यर्थः । ईस्य सर्वकर्ता सर्वज्ञस्य स्वयं बोधैकमात्रस्वरू
पो यत एकः परमेश्वरः स्वरसिद्धः स एवैको जगति जयतीति सिद्धम् ॥ विपर्ययमङ्कु
लोपरोधाद्वादिसिद्धमपि स्वप्रकाशनतत्त्वं न स्फुटयोगेन विधेयपदे समध्येदानीमनुवा
घं यच्छ्रुत्वापास्तं तच्छ्रुत्वापेक्षितया यथा निराकाङ्क्षः भवेन्न यावत्तिपादयितुं वाक्यान्तरमा

रचयति । अकलितेति । यः परमेश्वरोऽकलितमहिमा । सर्वत्र हि देशकालो मूर्तिक्रियावै
3 चित्र्याभासनसारो यत्कल्पितौ यदाभासितमितजडवस्तुपरिच्छेदकौ कथं तत्परिच्छेदकौ
स्यातामिति स स्वयमपरिच्छिन्नमहिमा देशतः कालतः स्वरूपतश्चापरिच्छिन्नत्वादन
न्तः सर्वकालव्यापी सर्वदेशव्यापी सर्वाकारव्यापी चेति । तथाचापरिच्छिन्नतामेवास्य व
क्तुं तत्र भगवान्हरिः दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये इत्याह । एतदेवालक्ष्य
सर्वथासङ्कोचप्रसङ्गोत्पुंसन्ताय सद्यश्च्युता साक्षादेव विश्वात्मकतां श्रीवसिष्ठ आह ।
दिग्विभूमौ तथाकाशो बहिरन्तश्च मे विभुः यो वभात्यवभासात्मा तस्मै सर्वात्मने नम इ
ग. प्र. त्ति । यदेतादृग्विभवः सर्वमिच्छाविलासं स्वात्ममात्रं विधत्ते । कथं विधत्ते इत्याह । प्रभुप
२ प्रउजडरूपमिति । तत्राद्वैतजडाजडभेदेन द्विधैव जगत्स्थितिः । येन वेद्यवेदकोभया

त्मकमेव सर्वम्‌ तत्र वेद्यस्य नानात्वेपि जडभित्त्येवमाकारेणैकरूपमेव। वेदकस्य भेद
द्वयम्‌ येन पशुर्द्वा पशुर्द्विप्रमातृवर्गपूर्तिः स्यात्‌ तदाह। प्रभुपशुजडरूपमिति। तत्र प्रभु
वर्गः कारणादिदेवान्तः, पशुवर्गः मनुष्यादिनारकिपर्यन्तः। एतेषां पशूनां च प्रभू
णां योगहेमादिपाशाः स्युः इति पशवः। पालकास्तु कारणाद्याः स्वाधीनस्वयोगहेमाद
तिप्रभवः इति स्थूलोऽयं पन्थाः। परमार्थतस्तु मायोत्तीर्णा विदितात्मतत्त्वाः प्रभवः
मायाधोवर्तिनोऽनात्मज्ञाः पशवः। तथा च, स्वात्मस्वरूपेषु भावेषु प्रमाता कथ्यते पतिः
मायातो भेदिषु क्लेशकर्मादिकलुषः पशुरिति। तदेव तत्सर्वमिच्छाविलासमित्य
नेन पराधीनतास्य निराकृता। मायापाशैस्तत्प्रभवत्वं स्वचितम्‌ जडत्वेनास्याश्च ना
दित्वात्सम्भवात्‌ श्रुतिश्च। सोऽकामयत बहु स्यामिति। तथा च। चिदात्मैव हि देवो

नः स्थितमिच्छातृष्णाद्युक्तिः योगीव निरुपादानमर्थजातं प्रकाशयेदिति स्मृतिः। तथा
स्यात्ममात्रमित्यनेनाभिन्नोपादाननिमित्तमिति मायापरमाण्वादादिनिरासः। तथा
च सोऽकामयत बहु स्यां प्रजायेयेति। तदैक्षत बहु स्यां प्रजायेयेति च इच्छापूर्विका
याः स्वातन्त्र्यप्रवृत्तेर्निमित्तत्वमिति बहु स्यामिति च प्रत्यगात्मविषयत्वाद्बहु
भवनाभिधानस्योपादानत्वमिति च गम्यते। अन्यत्र च साक्षाद्देवो भयमयत्वम
स्यान्नूम् तदात्मानं स्वयमकुरुतेति। आत्मानमिति कर्मत्वेनोपादानत्वम् स्वयमि
ति कर्तृत्वेन निमित्तत्वं पार्थक्येनापि चोपादानत्वं निमित्तत्वं च तस्य गम्यते। सर्वा
णि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यानीति प्रभव
प्रलययोरुपादाने एव प्रसिद्धत्वादुपादानत्वम्। एकमेवाद्वितीयमित्यवधारणा

इति गहनार्थप्रकाशिकाप्रथमश्लोकव्याख्या ॥